# Hakini Paranatha Stotram

# હાકિની પરનાથ સ્તોત્રમ્

## Document Information

Text title : Hakini Paranatha Stotram

File name : hAkinIparanAthastotram.itx

Category : devii, ShaTchakrashakti, devI, shiva

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 2 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 2 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator

muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# હાકિની પરનાથ સ્તોત્રમ્

અથ ત્ર્યશીતિતમઃ પટલઃ
શ્રીઆનન્દભૈરવ ઉવાચ
કથયસ્વ વરારોહે હાકિનીસ્તોત્રમુત્તમમ્ ।
યસ્ય પ્રપાઠનાદ્ વાગ્મી કૃપાયાસે દયામયિ ॥ ૮૩-૧॥

શ્રીઆનન્દભૈરવી ઉવાચ
અત્યદ્ભુતં સ્તોત્રવરં શ‍ૃણુ પ્રભો સર્વેશ્વરૈર્ભાવિતમાદિગુહ્યમ્ ।
યૈઃ પઠ્યતે સાધકચક્રનાથૈસ્તૈરેવ સિદ્ધૈરતિધર્મવિદ્ભિઃ ॥ ૮૩-૨॥

બ્રહ્માખ્યાં કામવિદ્યાં નરહરિજનનીં કામકૂટસ્વરૂપામ્ ।
હાકિન્યાખ્યાં શમ્ભુજાયાં ત્રિવધુમદનશાં તારિણીં સ્તૌમિ સિદ્ધામ્ ।
હેરમ્બાનન્દવિદ્યાં ત્રિસમનદમનીં દીર્ઘકેશીં ત્રિનેત્રામ્ ।
મન્દારારણ્યમધ્યે વિકસિતવદનામ્ભોજહાસપ્રકાશામ્ ॥ ૮૩-૩॥

હિરણ્યાલઙ્કારાં ત્રિતયનયનાં પટ્ટવસનાં
    મહાસ્નિગ્ધાં શુદ્ધાં કુલજનવરામિન્દુવદનામ્ ।
સદા સ્તૌતિ શ્રીદાં ભુવનકરુણાં ભાવતરુણાં
    ત્રિવેણીશ્વેતાભાં વસમયતનું ભ્રૂયુગદલે ॥ ૮૩-૪॥

મહાપદ્મવનોદ્રેકરમ્યસ્થાનનિવાસિનિ ।
હાકિનિ ત્વાં મુદા સ્તૌમિ તદ્ધર્મકુરુપાગતામ્ ॥ ૮૩-૫॥

સંસારાર્ણવતારિણીં નરહરિપ્રેમાભિલાષોન્મનીં
ભાવારમ્ભવિસર્જનૈકનિલયા માયાં મહાસુન્દરીમ્ ।
ભાસ્વત્કોટિસુરત્નસિંહવસતિં શ્રીહાકિનીં દ્રાવિણીં
સ્તૌમિ ક્ષેત્રનિરીક્ષણાય નિયતાં શ્રીભારતીભાવિતામ્ ॥ ૮૩-૬॥

સંસ્કારશ્રિયમાતનોતિ સહસા શ્રીપાર્વતીવલ્લભે ।
નાનારત્નકલાપદર્શનમહાજ્ઞાનં નિદાનં ધનમ્ ।

સા સાક્ષાદખિલેશ્વરી પરશિવાનન્દૈકબિન્દૂજ્જ્વલા ।
મામાદૌ પરિરક્ષતુ પ્રિયકરી સંસ્તૌમિ પીઠાન્તરે ॥ ૮૩-૭॥

આકાશવેદલિઙ્ગે સ્થિતિપથિમિલિતે ભાતિ સા રક્તબર્હા
સા માં પાત્વમ્બ કાલી કુલપથભવિકા ક્રોધનિઃક્રોધકર્ત્રી ।
તસ્યાઃ શ્રીપાદપદ્મત્રિભુવનભક્તકેશાલિમાલા
યુક્તં સર્વેન્દ્રપૂજ્યં નિરવધિકમલે દ્વે દલે સ્તૌમિ વિદ્યામ્ ॥ ૮૩-૮॥

સાઙ્ગં દ્વયં ત્વત્પ્રિયં પદયુગં પત્રદ્વયશ્રેયસં
મઞ્જીરાદ્ભુતહારપાદકમલં સમ્ભાવ્ય સંસ્તૌમ્યહમ્ ।
યદ્ ધ્યાત્વા હરિરીશ્વરો ગુણધરો જેતા મહારેઃક્ષણા-
દાશાપાશવિસર્જનૈકનિલયં ત્રૈલોક્યસંરક્ષકઃ ॥ ૮૩-૯॥

યા યાત્રા વ્રતવાસિની શશિમુખી છાગાદિમાંસપ્રિયા ।
મામેકં પરિપાલય ત્વમખિલે ત્વામેકરૂપાં શિવામ્ ।
સ્તૌમીન્દ્રાવનતિપ્રિયાં વાઙ્મોક્ષસહિતાનન્દૈકહેતુપ્રદામ્ ॥ ૮૩-૧૦॥

શિવસ્તુતિઃ

વરં પરં નમામ્યહં ગિરીન્દ્રરૂપગર્વહં
    મહેશ્વરં પરેશ્વરં શ્મશાનબીજગહ્વરમ્ ।
હિરણ્યરત્નભૂષણં શતેન્દુતેજસં તથા
    શિવં તનું પુનઃ પરપ્રભાપ્રભાકરમ્ ॥ ૮૩-૧૧॥

શરેણ્યં વરેણ્યં મહાકામધન્યં
    મહાદેવદેવં ત્રિકાલાદિજન્યમ્ ।
શ્મશાનોગ્રધૂલિપ્રિયાઙ્ગાનુલેપં
    સદા સ્તૌમિ સંસારસારં નિષેકમ્ ॥ ૮૩-૧૨॥

પરશિવં મનસા સહસા નિશિ
    પ્રતિદિનં પ્રણમામ્યહમાદિમમ્ ।
શશિમુખીશતચન્દ્રિકયાન્વિતં
    ભજનસાધક સત્ફલદાયકમ્ ॥ ૮૩-૧૩॥

પરશિવચરણાબ્જં હાકિનીશક્તિસેવ્યં
    ત્રિભુવનસુખદાનં ધ્યાનમાત્રપ્રકાશમ્ ।
અતિસુલલિતહસ્તામ્ભોજશોભાં વહન્તં
    ભુવિ નિજકુલસારં સ્તૌમિ યોગીન્દ્રગમ્યમ્ ॥ ૮૩-૧૪॥

શોક્કશોકાવલીલામતિ હિ કલયતિ પ્રાણદેહાભિલાષં
હાકિન્યાઃ પ્રાણનાથો ભવશમનકરો હીરકાસ્રગ્ધરો વા ।
સોઽસૌ ભૂપદ્મસારે રચયિત કલિકાં ચિત્તદીપસ્ય નિત્યાં
તસ્ય શ્રીપાદપદ્મં ગુણગણયજિતં પૂજિતં સ્તૌમિ ભાલે ॥ ૮૩-૧૫॥

મેરુશ‍ૃઙ્ગનિકેતનૈકવસનં ગોલોકસંસેવિતં
યજ્ઞાનન્દનિષેવિતં પરિશિવં યોગીન્દ્રચિત્તસ્થલમ્ ।
હાલાપાનનિરાકુલં પશુસમાં સામોદનાચર્વણાં
વન્દે નન્દિમહાદિભૈરવવરૈર્વન્દ્યં જગત્કારણમ્ ॥ ૮૩-૧૬॥

માયાપથચ્છલકલાકપિલાપતિસ્ત્વં
    ત્વં ભૂરવિપતિરૂપાપતિરેકચક્રઃ ।
આપોઽનલત્વમખિલે ગગનપ્રકાશા-
    વાયુસ્થમાવસિમુખં શરણં પ્રપદ્યે ॥ ૮૩-૧૭॥

વાઞ્છાકલ્પદ્રુમતલગતં હેમસિંહાસનસ્થં
    શ્રીહાકિન્યા રમણનિરતં કામકેલિપ્રકાશમ્ ।
માયામોહં ક્ષયમતિસુખં વિન્ધ્યશૈલાગ્રસંસ્થં
    વન્દે નાથં હરપરશિવં રૂપજાલપ્રકાશમ્ ॥ ૮૩-૧૮॥

ફલશ્રુતિકથનં
પઠેદ્ યઃ સ્તોત્રાર્થં ભવતિ સ સુખી યોગનિપુણઃ
ક્ષુધાતૃષ્ણાનાશઃ શ્રવણધૃતયશોવાસિસરસઃ ।
સ યોગીન્દ્રો માસાદતિશયપરાનન્દઘટકઃ
પરીતઃ પ્રાણાખ્યે રચયતિ સુધાસિન્ધુસુરસમ્ ॥ ૮૩-૧૯॥

એતત્ સ્તોત્રં પઠેદ્વિદ્વાન્ ધ્યાન ન્યાસ સમન્વિતમ્ ।
શુક્લં રક્તં તથા પીતં નીલં કૃષ્ણં વિભાવ્ય ચ ॥ ૮૩-૨૦॥

કાલચતુષ્ટયે નિત્યં પઠિત્વા સિદ્ધિમાપ્નુયાત્ ।
આકાશે ભૂતલે નાથ પાતાલે વિઘ્નકોટયઃ ॥ ૮૩-૨૧॥

યોગિનાં પઠનાદેવ નશ્યન્તિ તત્ક્ષણાદિહ ।
સર્વત્ર ગામી સ ભવેદતિભાગ્યફલોદયમ્ ॥ ૮૩-૨૨॥

મહાપાપહરં સ્તોત્રં હાકિનીહૃદયોદ્ભવમ્ ।

સદાશિવપ્રિયં યોગસિદ્ધિદં દેવસેવિતમ્ ॥ ૮૩-૨૩॥

સહસ્રવારપાઠેન પુરશ્ચર્યાફલં લભેત્ ।
પઠિત્વા સ્તોત્રરાજં તુ શ્મશાને નિર્જને વને ॥ ૮૩-૨૪॥

અન્તરિક્ષેઽથવા નાથ યોગી સ્યાદમરો મહાન્ ।
અસ્ય પ્રપઠનાદ્વાગ્મી જ્ઞાનવાન્ વિજિતેન્દ્રિયઃ ॥ ૮૩-૨૫॥

ધ્યાનાત્મા સમ્ભવેત્ ક્ષિપ્રં પરિવારગણૈઃ સહ ।
પ્રાતઃકાલે નિશાયાં તુ મધ્યાહ્ને શેષકાલકે ॥ ૮૩-૨૬॥

પ્રપઠેત્ સ્તોત્રસારં તુ ભાવાત્મા સાધકોત્તમઃ ।
અનાયાસેન ભ્રૂપદ્મે સ્થિરો ભવતિ નિશ્ચિતમ્ ॥ ૮૩-૨૭॥

શ્રીગુરોશ્ચરણામ્ભોજં હૃદયે ધ્યાનનિર્ણયમ્ ।
યો ધ્યાત્વા પઠ્યતે સ્તોત્રં સ ભવેત્ કલ્પપાદપઃ ॥ ૮૩-૨૮॥

ઇદાનીં કથયે નાથ કવચં પટલાન્તરે ॥ ૮૩-૨૯॥

ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને સિદ્ધમન્ત્રપ્રકરણે
ભૈરવીભૈરવસંવાદે હાકિનીપરનાથસ્તોત્રવિન્યાસો નામ
ત્ર્યશીતિતમઃ પટલઃ ॥ ૮૩॥

The numbers correspond to paTala and verse numbers from
Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

---

*Hakini Paranatha Stotram*

pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*